**संस्कृत-वार्ता:**

**दिनाङ्क :-17.09.2024** **प्रात: - 06:55**

**अथ वार्ताः**

**भारतजलसप्ताहः**

अष्टमस्य भारतजल-सप्ताहःचतुर्विंशत्यधिकद्विसहस्रं अद्यारभ्यः नवदेहल्यां आरप्स्यते। राष्ट्रपतिः द्रौपदीमुर्मुः भारत-मण्डपे अस्य कार्यक्रमस्य उद्घाटनं करिष्यति। चतुर्दिवसीये कार्यक्रमे चत्वारिंशद्-देशानां द्विशतं वैदेशिक-प्रतिनिधिभिः सह सम्मेल्य चतुःसहस्रं प्रतिनिधयः भागं ग्रहीष्यन्ति। अस्मिन् कार्यक्रमे एका प्रदर्शिनी अपि भवति तत्र च समुचित-जल-प्रबन्धनाधारिताः विषयाः प्रदर्शयिष्यन्ते। नवदेहल्यां जलशक्ति-मन्त्रालयस्य सचिवः देवाश्री-मुखर्जी अवदत् यत् सुजल-प्रबन्धनात् देशस्य आर्थिकवृद्धिः द्रुतगत्या वर्धिष्यते।

**जम्मू-कश्मीरे**

जम्मू-कश्मीरे विधानसभानिर्वाचनस्य प्रथमचरणीयमतदानाय सर्वा: सज्जता: अभवन्। अनन्तनाग-पुलवामा- शोपियां- कुलगाम- डोडा, रामबनही किश्तवाड़ सप्तमण्डलानां चतुर्विंशतिः विधानसभासनेषु श्वः अस्मिन् प्रथमे चरणे निर्वाचनं भविष्यति। कश्मीरमण्डलान्तर्गतं षोडश निर्वाचनक्षेत्राणि सन्ति, जम्मूमण्डले अष्ट-निर्वाचनक्षेत्राणि च सन्ति । प्रथमचरणे ऊनविंशत्यधिक द्विशतं यावत् प्रत्याशीनां भाग्यनिर्णयं पञ्च दशमलव षड्षष्ठि लक्षम् यून: समेत्य त्रयोविंशति दशमलव सप्तविंशति लक्षाधिकाः मतदातारः करिष्यन्ति। निर्वाचनायोगेन चतुर्विंशतिविधानसभाक्षेत्रेषु षड्सप्तत्यधिक-द्विशतोत्तर-त्रीणिसहस्राणि मतदानकेन्द्राणि स्थापितानि येन सुचारुतया, उपद्रवमुक्तं च मतदानं सुनिश्चितं भवति।

**नौसेनापतिसम्मेलनम्**

चतुर्विंशत्यधिक-द्विसहस्रतमवर्षस्य नौसैन्यपतिनां सम्मेलनस्य द्वितीय- संस्करणस्य आयोजनम् अद्य नवदिल्ल्यां भविष्यति। सम्मेलनमिदं नौसेनापतिसु महत्त्वपूर्ण-रणनीतिक-सञ्चालन-प्रशासनिक-विषयेषु विचार-विमर्शस्य सौविध्य प्रदानस्य शीर्षस्तरीयः द्विवार्षिकः कार्यक्रमः अस्ति । रक्षामन्त्रालयेन उक्तं यत्, चतुर्दिवसीयसम्मेलनस्य अस्य आरम्भः नौसेनाप्रमुखस्य उद्घाटन सम्भाषणेन भविष्यति।

**नरेन्द्रमोदीसर्वकारस्य शतदिनानि**

नरेन्द्रमोदीसर्वकारस्य तृतीयकार्यकालस्य शतदिनानि पूरितानि। मोदीसर्वकारस्य ऐतिहासिकतृतीयकार्यकालस्य प्रथमशतदिनेषु नैके प्रमुखाः उपक्रमाः निर्णयाः च नीताः यैः जनानां जीवने सकारात्मकः प्रभावः अभवन् तथा च विकसितभारत@सप्तचत्वारिंशदधिक द्विसहस्रम इत्यस्य सुदृढः आधारः स्थापितः।

**भारत - कॉप-9 ब्यूरो:**

भारतस्य नेतृत्वे अद्य नवदिल्ल्यां कॉप-9 ब्यूरो इत्यस्य द्वितीया औपचारिकसभा तथा च निधि अनुमोदन समितेः तृतीया औपचारिकसभायाः आयोजनं भविष्यति । कॉप-9 ब्यूरो इत्यस्य उपाध्यक्षत्वेन भारतं

दिनद्वयस्य उच्चस्तरीयोपवेशनस्य आयोजने प्रमुखमस्ति। विश्वस्य प्रमुखनिर्णयकर्तारः गणमान्यजनाः च एकत्रिताः भविष्यन्ति।

**<u>हॉकी एशियाई चैम्पियनशिपः</u>**

हॉकी एशियाई चैम्पियनशिपः अद्य चीनदेशस्य उलनब्यूर-नगरे चतुर्विंशत्यधिक द्विसहस्रतम वर्षस्य एशिया-चैम्पियन्स्-चषक प्रतिस्पर्धायाः निर्णायक द्वंद्वे भारतं चीन दलं सम्मुखीकरिष्यति ।क्रीडायाः प्रसारणं भारतीय समयानुसारं सार्ध त्रि वादने भविष्यति।

**<u>भाजपा - पीएम जन्मदिन :</u>**

प्रधानमन्त्रिणः नरेन्द्र मोदिनः जन्मदिवसावसरे भाजपादलीय: राष्ट्रीयाध्यक्ष: जगत प्रकाश नड्डा आज नवदिल्लीस्थिते दलमुख्यालये सेवापखवाडा इत्यस्य अन्तर्गतं रक्तदानशिबिरस्य उद्घाटनं करिष्यति। श्रीनड्डा: प्रधानमन्त्रिणः जीवनाधारितायाः एकस्याः प्रदर्शन्याः अपि उद्घाटनं करिष्यति।

-

**।।इति वार्ता:।।**